दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़शुक्लाष्टमी
श्रावण 05 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-271 | 1 | जुलाई 21, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 HP CABINET DECISIONS- हिमाचल-मन्त्रिमण्डलस्य उपवेशने बहवः प्रमुखाः निर्णयाः, स्वास्थ्य- शिक्षा- जीविकाक्षेत्रेषु सर्वकारस्य महत्वः उद्घोषणाः

3 भारतं लब्धवान् स्वकीयं प्रथमं डेंगु-सूच्यौषधम्, डी. सी. जी. आई. संस्थायाः स्वीकृतिः, ४ तः ६० वर्षपर्यन्ताः जनाः ग्रहीतुं शक्ष्यन्ति मात्राम्

4 KANGRA NEWS - भाजपादलस्य सीमादेवी काङ्गड़ा-जिलापरिषदः अध्यक्षा, अभिमन्युकँवरः च उपाध्यक्षः

## नीट-परीक्षा-पत्रप्रकटनविषये संसदि विपक्षस्य विरोधः, उभयोः सदनयोः स्थगनम्



संसदः मानसून-सत्रस्य प्रथमे दिने नीट-परीक्षायाः प्रश्नपत्र-प्रकटन (लीक) विषयम् अधिकृत्य विपक्षस्य विरोधस्य मध्ये द्वयोः अपि सदनयोः कार्यवाही अनेकवारं स्थगिता सती श्वः यावत् स्थगिता अभवत्।तस्मात् पूर्वम्, प्रातः एकादशवादने यदा लोकसभायाः उपवेशनम् आरब्धम्, तदा सम्प्रति दिवङ्गतेभ्यः षट्-पूर्वसदस्येभ्यः श्रद्धाञ्जलिः अर्पिता। एते सदस्याः सन्तिः नादेण्डला भास्कर रावः, ओमवती देवी, सुधांशु सीलः, निवृत्त-मेजर-जनरल भुवनचन्द्रखण्डूरी, के. पी. धनपालन्, प्यारेलालसाङ्खवारः च।सदनेन कतरस्य अमीर-शेख-हमद-बिन-खलीफा-अल-थानी-महोदयाय अपि श्रद्धाञ्जलिः अर्पिता। लोकसभाध्यक्षः ओम बिरला अवदत् यत् शेख-हमद-बिन-खलीफा-अल-थानी-महोदयः भारत-कतर-सम्बन्धान् सुदृढीकर्तुं महतीं भूमिकां निरुढवान्। श्रीबिरलामहोदयः अकथयत् यत् सः अष्टादशवर्षाणि यावत् कतरस्य 'अमीर' रूपेण कार्यम् अकरोत्, आधुनिककतरस्य आधारशिलां च अस्थापयत्।

यदा अध्यक्षः प्रश्नकालम् आरब्धुं प्रयासम् अकरोत्, तदा काङ्ग्रेस-समाजवादी-पार्टी-सहितैः विपक्षस्य सदस्यैः नीट-परीक्षायाः प्रश्नपत्र-प्रकटनस्य मुद्दा उत्थापिता। श्रीबिरलामहोदयः विपक्षं सदनस्य सञ्चालने सहयोगं कर्तुं मर्यादां च रक्षितुं न्यवेदयत्, किन्तु विपक्षीयाः सदस्याः स्वविरोधम् अनुवृत्तवन्तः, येन लोकसभा मध्याह्ने द्वादशवादनं यावत् स्थगिता अभवत्। मध्याह्ने द्वादशवादने प्रथमस्थगनान्तरं यदा सदनम् पुनः आरब्धम्, तदा अपि विपक्षीयाः सदस्याः स्वविरोधं निरन्तरम् अकुर्वन्। कोलाहलस्य मध्ये अध्यक्षः सदनं शार्ध-द्वादशवादनं (१२:३०) यावत् स्थगितवान्। सार्ध-द्वादशवादने द्वितीयस्थगनान्तरं यदा पुनः सदनस्य कार्यवाही प्रारब्धा, तदा विपक्षस्य सदस्यैः नीट-परीक्षायाः प्रश्नपत्र-प्रकटनस्य मुद्दे स्वविरोधः पुनः आरब्धः। पीठासीनः अधिकारी दिलीपसैकीयामहोदयः सदनं सुचारूरूपेण सञ्चालयितुं यतमानः अवदत् यत् सदने स्वस्था चर्चा भवेत्। सः अकथयत् यत् जनता संसदः महत्वपूर्णान् विषयान् उत्थापयितुं स्वप्रतिनिधीन् प्रेषितवती अस्ति।

## 'स्माइल'-योजनायाः माध्यमेन वञ्चितवर्गाणां भिक्षावृत्तिसंलग्न-जनानां च व्यापकपुनर्वासः

सामाजिक-न्याय-एवं-सशक्तीकरण-मन्त्रालयः दुर्बल-वञ्चित-वर्गाणां सामाजिक-आर्थिक-पुनर्वासाय 'स्माइल' (SMILE) इति योजनां कार्यान्वयति। अस्याः योजनायाः उद्देश्यं आवश्यकतावद्भ्यः जनेभ्यः सम्मानपूर्ण-जीवनयापनाय तथा च स्थायी-जीविकायाः अवसराणां प्रदानाय अस्ति।मन्त्रालयस्य अनुसारं 'स्माइल'-योजनायाः माध्यमेन भिक्षावृत्तौ संलग्नानां जनानां व्यापके पुनर्वासे कार्यं क्रियते, येन 'भिक्षा-मुक्त-भारतस्य' लक्ष्यम् अग्रे नेतुं शक्येत।

## मुख्य-निर्वाचनायुक्तस्य ज्ञानेश-कुमारमहोदयस्य बेनिन-देशस्य राजदूतेन सह मेलनम्, निर्वाचन-प्रबन्धने सहयोगस्य सहमतिः

मुख्य-निर्वाचनायुक्तः तथा च 'अन्तर्राष्ट्रिय-लोकतन्त्र-एवं-निर्वाची-सहायता-संस्थान'स्य अध्यक्षः ज्ञानेशकुमारमहोदयः नवदेहल्यां बेनिन-देशस्य राजदूतेन एरिक-जीन-मैरी-ज़िंसौ-महोदेन सह मेलनम् अकरोत्। चर्चायाः समये तौ निर्वाचन-प्रबन्धनस्य सुदृढीकरणाय तथा च निर्वाचन-कर्मचारिणां प्रशिक्षणे अधिक-सहयोगं कर्तुं सम्मतिं प्रकटीकृतवन्तौ।

### लोकसभाध्यक्षस्य ओम-बिरलामहोदयस्य संयुक्त-अरब-अमीरातस्य (UAE) मन्त्रिणा सह मेलनम्, द्विपक्षीयसम्बन्धानां सुदृढीकरणे बलम्

लोकसभाध्यक्षः ओम बिरला महोदयः अद्य नवदेहल्यां स्थितस्य संसदभवनस्य परिसरे संयुक्त-अरब-अमीरातस्य (UAE) अर्थव्यवस्था-पर्यटन-मन्त्रिणा अब्दुल्ला-बिन-तौक-अल-मरी-महोदेन तस्य प्रतिनिधिमण्डलेन च सह मेलनम् अकरोत्।

ओम बिरला महोदयः सामाजिक-माध्यमेन (सोशल मीडिया) अवदत् यत् एतत् मेलनं परस्पर-विश्वासम्, साझा-हितम् तथा च घनिष्ठ-सहयोगम् आधारितं भारत-यूएई देशयोः सुदृढ-सहभागितां दर्शयति। सः अकथयत् यत् उभयपक्षतः द्विपक्षीय-सम्बन्धान् अधिकं सुदृढीकर्तुं जनानां मध्ये च परस्पर-सम्पर्कं वर्धयितुं प्रति साझामयी प्रतिबद्धता पुनः प्रदर्शिता।

## अयोध्यातः राममन्दिरसमर्पणराशेः अपहारप्रकरणम्:

### सर्वोच्चन्यायालयः उत्तरप्रदेशसर्वकारात् 'एसआईटी'विषये सूचनाम् अयाचत

सर्वोच्चन्यायालयः उत्तर प्रदेश सर्वकारं प्रति अयोध्यायाः राममन्दिरे दानराशेः कथित-अपहारस्य (गबनस्य) अन्वेषणाय विशेष-अन्वेषण-दलस्य (SIT/एसआईटी) गठनस्य सम्भावनायाः विषये सूचनां प्रदातुम् अकथयत्। न्यायालयः याचिकाकर्तृभ्यः अस्य विषयस्य राजनीतिकीकरणं न कर्तुं संतर्जना अयच्छत्।प्रधानन्यायाधीशस्य सूर्यकान्तस्य, न्यायमूर्तेः जॉयमाल्यबागचिनः, न्यायमूर्तेः वी. मोहनायाः च पीठः उत्तर प्रदेश सर्वकारस्य पक्षतः उपस्थितं सॉलिसिटर जनरल तुषार मेहता महोदयम् एतस्मिन् विषये निर्देशान् ग्रहीतुम् अकथयत् यत्— 'किम् प्रथम-सूचना-पत्रस्य (FIR) पञ्जीकरणात् पूर्वं सम्पूर्णस्य प्रकरणस्य अन्वेषणं कुर्वते एसआईटी-दलाय एव स्थानीय-आरक्षकाणां (पुलिस) स्थाने अस्य मामलेस्य अन्वेषणभारः पोषयितुं शक्यते?'सर्वोच्चन्यायालयः अस्याः याचिकायाः उपरि जुलै-मासस्य २७ तमे दिनाङ्के पुनः शृणोष्यति , यदा उत्तर प्रदेश सर्वकारः एतस्मिन् प्रकरणे एसआईटी-अन्वेषणस्य विषये सूचनां दास्यति। प्रधानन्यायाधीशः अवदत् यत् एतत् अपराधस्य एकं साधारणं प्रकरणम् अस्ति, न्यायालयस्य कार्यं च केवलम् उचित-अन्वेषणं सुनिश्चितं करणम् एव अस्ति। तुषार मेहता महोदयः अकथयत् यत् अन्वेषणं प्रचलद् अस्ति तथा च अष्ट जनाः गृहीताः (अरेस्ट कृताः) सन्ति। सः अवदत् यत् सत्यस्य अन्वेषणाय एसआईटी-दलस्य गठनम् अभवत्। अधुना आरक्षकाः (पुलिस) अस्य अन्वेषणं कुर्वन्तः सन्ति। एसआईटी-दलेन दृष्टं यत् एतस्मिन् संज्ञेय-अपराधः अस्ति।

## सुभाषितम्

न भेतव्यं न बोधव्यं
न श्राव्यं वादिनो वचः।
झटिति प्रतिवक्तव्यं
सभासु विजिगीषुभिः।।

भावार्थः- किसी भी सभा में जहां तुम्हारे विरोधी हों, न तो उनसे डरो, न उनकी बेकार की बातें सुनकर उन्हें समझाने का प्रयत्न करो क्योंकि वे तुरन्त अपने प्रत्युत्तर द्वारा तुम्हें अपनी बातों में उलझाने लगेंगे।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

### पीयूषगोयलमहोदयस्य संयुक्त-अरब-अमीरातस्य मन्त्रिणा सह मेलनम्, आर्थिक-सहभागितायाः सुदृढीकरणे बलम्

वाणिज्य-उद्योग-मन्त्री पीयूषगोयलमहोदयः नवदेहल्यां संयुक्त-अरब-अमीरातस्य (UAE) अर्थव्यवस्था-पर्यटन-मन्त्रिणा अब्दुल्ला-बिन-तौक-अल-मरी-महोदेन तस्य प्रतिनिधिमण्डलेन च सह उपवेशनम् (बैठक) अकरोत्। श्रीगोयलमहोदयः अवदत् यत् उपवेशने व्यापार-निवेश-पर्यटन-आवागमन-क्षेत्रेषु द्विपक्षीय-सहभागितां सुदृढीकर्तुं चर्चा अभवत्।सः अकथयत् यत् अस्य मेलनस्य समये व्यवसायेभ्यः नूतनानाम् अवसराणाम् उद्घाटनस्य, जनानां मध्ये सम्बन्धान् सुदृढीकर्तुं तथा च रणनीतिक-आर्थिक-सहभागिताम् अग्रे नेतुं साझा-प्रतिबद्धतायाः पुष्टिः अभवत्।

# HP CABINET DECISIONS- हिमाचल- मन्त्रिमण्डलस्य उपवेशने बहवः प्रमुखाः निर्णयाः, स्वास्थ्य- शिक्षा- जीविकाक्षेत्रेषु सर्वकारस्य महत्यः उद्घोषणाः







हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशमन्त्रिमण्डलस्य उपवेशनं सोमवासरे मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू महोदयस्य अध्यक्षतायाम् अभवत्, यस्मिन् जनहिताय बहवः प्रमुखाः निर्णयाः गृहीताः। मन्त्रिमण्डलेन चिकित्सा- शिक्षा- अनुसन्धानविभागे कार्यरत- सुपर- स्पेशलिटी- सङ्कायसदस्येभ्य' 'नॉन- प्रैक्टिसिंग अलाउंस' प्रदातुं निर्णयः विहितः। साकमेव चिकित्सा-विभागे पी.जी. छात्राणां मासिक- वृत्तिकायां महती वृद्धिः कृता। नूतनानुसारं प्रथमवर्षस्य छात्रेभ्यः ४०,००० स्थाने ५०,००० रूप्यकाणि, द्वितीयवर्षस्य छात्रेभ्यः ४५,००० स्थाने ६०,००० रूप्यकाणि तथा च तृतीयवर्षस्य छात्रेभ्यः ५०,००० स्थाने ६५,००० रूप्यकाणि प्रतिमासं प्राप्स्यन्ते।

## शिक्षकेभ्यः नकद-पुरस्कार-राशौ वृद्धिः

मन्त्रिमण्डलेन शिक्षकपुरस्कारनीतेः अन्तर्गतं राष्ट्रिय- राज्य- पुरस्कारप्राप्तशिक्षकाणां नकदराशौ उल्लेखनीयः विस्तारः विहितः। अधुना राष्ट्रियपुरस्कारप्राप्तशिक्षकाय ६०,००० स्थाने १.५० लक्षरूप्यकाणि, राज्यपुरस्कारप्राप्तशिक्षकाय च ४०,००० स्थाने एकलक्षं रूप्यकाणि नकदत्वेन प्रदास्यन्ते। परं पुरस्कारप्राप्तकर्मचारिभ्यः सेवाविस्तारः न प्रदीयेत।

## आशाकार्यकर्त्रीणां, नम्बरदाराणां, प्रतिहारीणां च मानदेये वृद्धिः

उपवेशने नम्बरदाराणां मासिकमानदेयं ५०० रूप्यकाणि वर्धयित्वा ५,००० रूप्यकाणि कृतम्। स्वास्थ्यसेवानां सुदृढीकरणाय आशाकार्यकर्त्रीणां मासिकमानदेयं १ अप्रैल २०२६ दिनाङ्कात् ५,८०० रूप्यकेभ्यः वर्धयित्वा ६,८०० रूप्यकाणि विहितम्। साकमेव १२ वर्षाणि यावत् निरन्तरसेवा पूरितवन्तः अंशकालिकाः पञ्चायत- प्रतिहारिणः अधुना दैनिकवेतनभोगिरूपेण परिगणिष्यन्ते।

## आयुर्विज्ञान- महाविद्यालयानाम् आसन- सङ्ख्यासु संशोधनम् नीतिश्च

मन्त्रिमण्डलेन आईजीएमसी शिमला तथा च टाण्डामहाविद्यालये बी.एससी. मेडिकल टेक्नोलॉजी (रेडियोथेरेपी) पाठ्यक्रमेभ्यः प्रतिवर्षं ३०-३० आसनानि निर्धारितानि। पी. जी./ एस. एस. नीतौ संशोधनानुसारं, पी.जी. पदवीधर- जीडीओ, साक्षात्-अभ्यर्थिनश्च यदि चमियाना- संस्थाने अथवा आईजीएमसीं विहाय अन्यमहाविद्यालयेषु रेडियोडायग्नोसिस क्षेत्रे सेवां यच्छन्ति, तर्हि ते अनिवार्य-क्षेत्रीय-नियोजनात् मुक्तिं लप्स्यन्ते। हमीरपुरस्य नादौन-धनेटा क्षेत्रे ७५ एकडभूमौ 'अखिलभारतीय आयुर्वेद संस्थानम्' स्थापयिष्यते।

## लोकनिर्माणविभागस्य कनिष्ठ-अभियन्तॄणां कृते विशेषवृत्तिः मार्गसुरक्षानीतिश्च

लोकनिर्माणविभागे कार्यरतेभ्यः प्रायः ९०० क्षेत्रकनिष्ठ-अभियन्तृभ्यः कार्य-लेखा-प्रबन्धनस्य प्रभावी- सञ्चालनाय १,००० रूप्यकाणां विशेषवृत्तिः स्वीकृता। बिलासपुरस्य लोकनिर्माणविभाग- मण्डल- २ इत्यस्य कार्यालयः 'जगातखाना' क्षेत्रे स्थानान्तरितः। प्रदेशे मार्गेषु दुर्घटनानां संकटं न्यूनीकर्तुं 'सड़क सुरक्षा ऑडिट नीति' अनुमोदिता। नादौन-क्रीडाकेन्द्राय १२.८९ कोटिरूप्यकाणाम् उपकरणानां क्रयणं स्वीकृतम्।

## सहस्रशः नूतनपदानां सृजनं पूरणं च

प्रशासनेन ग्रामपञ्चायतेषु ४०० मल्टी-टास्क वर्कर पदानां, नादौन-एक्वा-पार्के १५ पदानां, शिक्षाविभागे २०० जूनियर ऑफिस असिस्टेंट पदानां, ग्रामपञ्चायतेषु च २८० जॉब ट्रेनी टेक्निकल असिस्टेंट पदानां नियुक्तिं प्रति स्वीकृतिः प्रदत्ता। नूरपुरमण्डले आरक्षि-लायन्स् कृते १०२ पदानां, तथा च १९७५ सर्वकारीय- वरिष्ठ- माध्यमिक- विद्यालयेषु ३९५० प्रहरी- मल्टीटास्क कर्मचारिणां नियोजनं भविष्यति।

## चिकित्सा-मत्स्य-न्यायविभागेषु अपि नियुक्तयः-

हमीरपुर- क्रीडाकेन्द्राय ४८ पदानां, लघुबचतविभागे १० पदानां, पञ्चायतीराजविभागे ६ लेखापरीक्षकाणां, ९ जेओए-आईटी च पदानां स्वीकृतिः दत्ता। आईजीएमसी, चमियाना तथा च हमीरपुर- मण्डी- चम्बा- नाहन- चिकित्सालयेषु च डायलिसिस- तकनीशियन-पदानां सृजनं भविष्यति। टाण्डायां गैस्ट्रोइंटेस्टाइनल- शल्यक्रियाविभागे २ सहायक- प्राध्यापकपदां, मत्स्यविभागे १० पदां, जुब्बल- क्रीडाविद्यालये ५ पदानां, योजनाविभागे ६ पदानां च स्वीकृतिः प्रदत्ता। शिमला, मण्डी, धर्मशाला, ऊना क्षेत्रेषु स्थायी लोक-न्यायालयानां स्थापनाय ४ अध्यक्षाणां, ८ सदस्यानां १६ अन्यानां च पदानां सृजनं विहितम्।

## आरक्षिकाणां नियुक्तिप्रक्रियायां वयसि शमनम्

आरक्षिविभागे ८०० कान्स्टेबल-पदानां नियुक्तये आवेदकेभ्यः अधिकतम-आयुसीमायां वर्षैकस्य (१ वर्षस्य) विशेषशमनं प्रदत्तम्। राजीवगान्धी स्वरोजगार योजनायाः ई-टैक्सी घटके अधिकतम- आयुः ४५ तः ५० वर्षाणि कृता। रोगी कल्याणसमितिभ्यः नैदानिकपरीक्षणानाम् आयस्य ५० प्रतिशतं भागं स्वच्छतायै रासायनिकपदार्थानां क्रयणाय च व्ययकर्तुम् अधिकारः दत्तः।

## धीवराणां कृते सम्माननिधिः योजनाश्च

वित्तीयवर्षे २०२६-२७ मध्ये डी.बी.टी. माध्यमेन धीवरेभ्यः ७० प्रतिशतं अनुदानेन नौकानां वितरणं, ९० प्रतिशतम् अनुदानेन मत्स्यजाल-उपकरणानां च वितरणं स्वीकृतम्। शीतगृहं, शीतवाहन- संस्थापनाय च ७० प्रतिशतम् अनुदानं दास्यते। धीवरपरिवारेभ्यः प्रतिबंधित-ऋतौ ३,५०० रूप्यकाणां साहाय्यार्थं 'मुख्यमंत्री मछुआरा सम्मान निधि योजना' आरप्स्यते।

## बालपोषणाय मिड-डे-मील योजनायां संशोधनम्

'मुख्यमंत्री बाल पौष्टिक आहार योजना' इत्यस्यां संशोधनेन अधुना सर्वकारीविद्यालयानां नर्सरीतः अष्टमीकक्षां यावत् छात्रेभ्यः माध्याह्नभोजने सप्ताहे वारद्वयं पक्वं कुक्कुटाण्डम् अथवा ऋतुफलानि प्रदास्यन्ते। वार-जागीर-अनुदानं ७,००० तः १०,००० रूप्यकाणि कृतम्। फोजल- जलविद्युत्- परियोजनायाः क्षमता ९ मेगावाट्तः १६ मेगावाट् कृता। शिमला- जाठियादेवी माउंटेन सिटी विकासाय अनुमतिः प्राप्ता।

## सी.बी.एस.ई. उपसमित्याः संस्तुतीनां स्वीकृतः, विकासनगरे वाणिज्यिकपरिसरश्च

काङ्गड़ा-बड़ोह क्षेत्रे अग्निशमनकेन्द्रस्य संस्थापनं, गलोड़-आरक्षिकेन्द्रे ५ नूतनपदानां सृजनं, तथा च मनाली- पर्वतारोहणसंस्थाने ४ प्रशिक्षकपदानां पूरणं स्वीकृतम्। सी.बी.एस.ई. विद्यालयेभ्यः मन्त्रिमण्डल- उपसमित्याः संस्तुतयः कतिपयसंशोधनैः सह स्वीकृताः। शिमलायाः विकासनगरे पी.पी.पी. आधारेण एकः बहुउद्देशीय- वाणिज्यिक- परिसरः निर्मास्यते। टाण्डा, मण्डी, ऊना, घवाण्डल तथा च चमियाना चिकित्सालयेषु ५ क्रिटिकल-केयर-ब्लॉक कृते उपकरणानां क्रयणं स्वीकृतम्।

# होर्मुज-स्ट्रेट (Strait of Hormuz) क्षेत्रे प्राणांस्त्यक्तवतः

## आदित्यशर्मणः परिजनैः मुख्यमंत्रिणा सह मेलनम्, न्यायस्य याचना कृता

हिमसंस्कृतवार्ताः- हमीरपुरम्। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुमहोदयेन सह हमीरपुरमण्डलस्य गलोड़क्षेत्रस्य राजेशशर्मणा मेलनं कृतम्। 'स्ट्रेट ऑफ होर्मुज' क्षेत्रे विगतेषु दिनेषु स्वप्राणांस्त्यक्तवतः आदित्यशर्मणः पित्रा राजेशशर्मणा मुख्यमन्त्री आग्रहितः यत् आदित्यशर्मणः असामयिक- मृत्योः प्रकरणं केन्द्रसर्वकारस्य समक्षम् उपस्थापनीयं, यतो हि अधुना यावत् अस्मिन् प्रकरणे केन्द्रसर्वकारस्य पक्षतः काऽपि कार्यविधिः न विहिता। मुख्यमन्त्रिणा शोकग्रस्ताय परिवाराय संवेदनाः प्रकटीकुर्वता प्रतिपादितं यत् राज्यसर्वकारः दृढतया परिवारेण सह तिष्ठति। तेन आश्वासितं यत् सः एतद् प्रकरणं केन्द्रसर्वकारस्य समक्षम् उथापयिष्यति येन परिवाराय न्यायः प्राप्तुं शक्येत्। मुख्यमन्त्रिणा दिवंगत-आत्मनः शान्तये प्रार्थना कृता। अस्मिन् कारुणिके अवसरे आदित्यशर्मणः माता सुषमाशर्मा अपि उपस्थिता आसीत्।

# द्वितीया पत्नी अपि पारिवारिक-पेंशन-लाभस्य अधिकारिणी, उच्चन्यायालये सर्वकारस्य याचिका निरस्ता




हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेश-उच्चन्यायालयेन पारिवारिक-पेंशन विषये एकः महत्त्वपूर्णः निर्णयः प्रदत्तः। न्यायालयेन प्रतिपादितं यत् विशेष- परिस्थितिषु एकस्य सर्वकारीय- कर्मचारिणः द्वितीया पत्नी अपि पारिवारिक-पेंशनं प्राप्तुम् अधिकारिणी वर्तते। मुख्यन्यायाधीशस्य गुरमीतसिंहसन्धावालिया महोदयस्य, न्यायाधीशस्य बिपिनचन्द्रनेगी महोदयस्य च खण्डपीठेन राज्यसर्वकारस्य याचिकां निरस्तीकृत्य एकल-न्यायाधीशस्य तस्य निर्णयस्य पुष्टीकरणं विहितं, यस्मिन् याचिकाकर्त्र्यै उर्मिलादेव्यै पारिवारिकपेंशनं प्रदातुम् आदेशाः दत्ताः आसन्।

# भारतं लब्धवान् स्वकीयं प्रथमं डेंगु-सूच्यौषधम्, डी. सी. जी. आई. संस्थायाः स्वीकृतिः, ४ तः ६० वर्षपर्यन्ताः जनाः ग्रहीतुं शक्ष्यन्ति मात्राम्




**हिमसंस्कृतवार्ताः- नवदेहली।** डेंगु-रोगस्य प्रथमस्य स्वदेशी-सूच्यौषधस्य विपण्याम् अवतारणाय भारतस्य औषधि- महानियन्त्रकस्य स्वीकृतिः प्राप्ता अस्ति। 'क्यूडेंगा' नाम्ना एतद् सूच्यौषधं 'टाकेडा बायोफार्मास्युटिकल्स इण्डिया' इति कम्पन्या निर्मितः अस्ति। डीसीजीआई-संस्थया नूतन-औषधि- नैदानिक- परीक्षण नियम-२०१९ इत्यस्य 'सीटी-२०' (CT-20) प्रावधानस्य अन्तर्गतं चतुर्तः ६० वर्षपरिमित-आयुयुक्तेषु जनेषु डेंगु-निवारणाय अस्य सूच्यौषधस्य विपण्यां प्रवेशाय अनुमतिः प्रदत्ता। कम्पन्या सोमवासरे ज्ञापितं यत् क्यूडेंगा-टीकायै लब्धा इयं स्वीकृतिः देशे डेंगु-रोगस्य प्रतिरोधात्मक-व्यवस्थायाः सुदृढीकरणाय एकं महत्त्वपूर्णं पदं वर्तते। देशे स्वीकृतिं प्राप्तकर्तृ डेंगु-रोगस्य एतद् प्रथमं सूच्यौषधमस्ति। कस्मैचित् पूर्वं डेंगु-सङ्क्रमणं अभवत् वा न, तथापि सः एतं ग्रहीतुं शक्नोति।डेंगु-रोगः मशकैः प्रसरन् एकः विषाणुजनितः व्याधिः अस्ति। विश्वस्य १२५ तः अधिकेषु देशेषु एषः सार्वजनिक-स्वास्थ्यस्य कृते गम्भीरा समस्या संजाता। विश्वे डेंगु-रोगस्य आहत्य प्रकरणानां प्रायः एकस्तृतीयांशः (एक-तिहाई) भागः केवलं भारते एव वर्तते। वर्षे २०२५ मध्ये देशे डेंगु-रोगस्य १.१३ लक्षात् अधिकाः प्रकरणाः पञ्जीकृताः (दर्ज) आसन्। अनुमानम् अस्ति यत् एतस्मात् अपि अधिकेषु प्रकरणेषु रोगस्य परिचयं न भवितुं शक्नोति।टाकेडा-कम्पन्यां 'इण्टरकौण्टीनेण्टल मार्केट्स' इत्यस्य प्रमुखेन महेन्द्रनायकेन प्रोक्तं यत्, "क्यूडेंगा- सूच्यौषधस्य सप्तवर्षाणां नवीनतम-विवरणानि दर्शयन्ति यत् एतद् सूच्यौषधं डेंगु-सङ्क्रमणात्, डेंगु-कारणात् च चिकित्सालये प्रवेशस्य सङ्कटात् निरन्तरं सुरक्षां ददाति। एषः डेंगु-रोगस्य चतुर्षु अपि विषाणु-सीरोटाईपेषु प्रभावी वर्तते। समाजस्य स्वास्थ्यव्यवस्थायाश्च कृते इयम् एका प्रमुखा उपलब्धिः अस्ति। वर्षे २०२२ मध्ये शुभारम्भात् परं क्यूडेंगा-टीकायै ४३ देशेषु स्वीकृतिः प्राप्ता अस्ति समग्रविश्वे च अस्य ३.२ कोटितः अधिकाः मात्राः (डोज) वितरिताः सन्ति। भारते प्राप्ता इयं स्वीकृतिः डेंगु-प्रतिरोधस्य सुदृढीकरणाय एकं प्रमुखं पदम् अस्ति।"कम्पन्यां दक्षिण-पूर्व-एशिया तथा च इण्डिया- क्लस्टर इत्यस्य महाप्रबन्धकेन पीटर-स्ट्राइबलेन कथितं यत्, "डेंगु-रोगः केवलं कस्यापि एकस्य देशस्य समस्या नास्ति, अपितु एषः अस्मिन् सम्पूर्णे क्षेत्रे सम्मुखीभूता एका समानाह्वानं वर्तते, यस्य निस्तारणाया सीमातः परे गत्वा सहयोगस्य आवश्यकता अस्ति। टाकेडा-कम्पनी दक्षिण- दक्षिण- पूर्व- एशिया देशेषु सर्वकारैः, सार्वजनिक-स्वास्थ्य-संस्थाभिः, स्वास्थ्य-विशेषज्ञैः अन्यैः च सहभागिभिः साकं मिलित्वा कार्यं कर्तुं कटिबद्धा अस्ति।"

## तृतीयचरणस्य नैदानिक-परीक्षणस्य योगदानम्

भारते क्यूडेंगा-सूच्यौषधस्य स्वीकृति-प्राप्तौ अत्र विहितस्य तृतीयचरणस्य नैदानिक-परीक्षणस्य विवरणानाम् अपि महत् योगदानम् अस्ति। चतुर्तः ६० वर्षपरिमित-आयुवर्गीयेषु भारतीय-प्रतिभागिषु विहितेन अध्ययनेन ज्ञातं यत् स्वस्थ-वयस्काः, किशोराः, बालकाश्च सरलतया क्यूडेंगा-मात्रां पचितवन्तः। इयं सूच्यौषधिः ०.५ मिलीलीटर परिमाणे त्वचायाः अधः दीयते। अस्य टीकीकरणं द्वाभ्यां मात्राभ्यां पूर्णं भवति द्वयोः मात्रायोः मध्ये च त्रयाणां मासानाम् अन्तरालं रक्ष्यते। विश्वस्वास्थ्यसङ्गटनेन डेंगु-प्रभावितेषु क्षेत्रेषु क्यूडेंगा-सूच्यौषधस्य उपयोगस्य अनुशंसा कृता अस्ति। सङ्गटनेन उच्च-सङ्क्रमण-युक्तेषु क्षेत्रेषु सार्वजनिक-टीकाकरणकार्यक्रमेषु अस्य समावेशनस्य अपि समर्थनं विहितम्।

# महिलानां वास्तविक-सशक्तीकरणाय तासाम् आर्थिक- आत्मनिर्भरता अनिवार्या- उच्चन्यायालयः

खण्डपीठेन पेंशन-नियमानां केवलं तान्त्रिक- व्याख्या-करणस्य प्रवृत्तौ तीव्रा आपत्तिः प्रकटीकृता। न्यायालयेन प्रोक्तं यत् यदा विषयः पेंशन-सदृशानां सामाजिक-कल्याणकारी- लाभानां भवति, तदा अधिकारिभिः न्यायालयैश्च एकः संवेदनशीलः सकारात्मकश्च दृष्टिकोणः आश्रयणीयः। महिलानां वास्तविक- सशक्तीकरणाय तासाम् आर्थिकरूपेण आत्मनिर्भरता अनिवार्या वर्तते। सर्वोच्च-न्यायालयस्य ऐतिहासिक-निर्णयानां सन्दर्भं ददता खण्डपीठेन स्पष्टीकृतं यत् 'हिन्दू विवाह अधिनियम १९५५' इत्यस्य अन्तर्गतं यद्यपि प्रथमपत्न्याः जीवनावधौ विहितः द्वितीयविवाहः विधिकरूपेण शून्यः (अवैधः) भवितुं शक्नोति, तथापि एषः अनैतिकः इति वक्तुं न शक्यते।

## असहायायाः महिलायाः आश्रयहीनतायाः रक्षणम् एव पारिवारिक-पेंशनस्य मुख्यमुद्देश्यम्

न्यायालयेन स्पष्टशब्देषु कथितं यत् पारिवारिक- पेंशन-प्रदानस्य उद्देश्यं समाजस्य आर्थिकरूपेण दुर्बलस्य आश्रितस्य च जनस्य कृते जीवनवृत्त्याः उद्देश्यात् भिन्नं नास्ति। अस्य मुख्यमुद्देश्यं कस्याश्चित् असहायायाः महिलायाः आश्रयहीनतायाः रक्षणं वर्तते। न्यायालयेन स्वीकृतं यत् यदि द्वौ पक्षौ सुदीर्घकालं यावत् पति-पत्नी इव एकत्र निवसतः, तर्हि विधिकरूपेण तयोः विवाहस्य वैधतायाः पक्षे एकं दृढम् अनुमानम् उत्पद्यते।

## सर्वकारेण एकल-न्यायाधीशस्य निर्णयः आह्वानास्पदः कृतः आसीत्

न्यायालयः अमन्यत यत् अस्मिन् प्रकरणे द्वितीयविवाहात् जाताः पुत्राः अपि अधुना वयस्काः संजाताः, प्रथमपत्न्याश्च कापि सन्ततिः नासीत्, येन कस्यापि अन्यपक्षस्य अधिकाराणां हननं न भवति स्म। उल्लेखनीयं वर्तते यत् राज्यसर्वकारेण एकल- न्यायाधीशस्य तस्य निर्णयस्य कृते आह्वानं दत्तम् आसीत्, यस्मिन् उर्मिलादेव्याः पक्षे पेंशन-वितरणस्य आदेशः आसीत्।

## निश्चितसमये अवशिष्टधन- अप्रदाने प्रतिवर्षं षट्प्रतिशतं (6%) व्याजम् अपि दातव्यं भविष्यति

अनेन सह, निश्चित-समयसीमाभ्यन्तरे अवशिष्टधनस्य अप्रदाने सर्वकारेण प्रतिवर्षं षट्प्रतिशतं (६%) दरेण व्याजम् अपि देयं भविष्यति। सर्वकारस्य तर्कः आसीत् यत् कर्मचारिणः द्वितीयविवाहः वर्षे १९८७ मध्ये तस्य प्रथमपत्न्याः (रेशमूदेव्याः) जीवनावधौ अभवत्। अतः, 'केन्द्रीय सिविल सेवा (पेंशन) नियम १९७२' इत्यस्य अन्तर्गतम् अस्य द्वितीयविवाहस्य मान्यता न दातुं शक्यते तस्याः आवेदनस्य निरस्तीकरणं च न्यायसङ्गतम् आसीत्।

# केन्द्रीयमन्त्रिणः जे. पी. नड्डामहोदयस्य प्रदर्शनकारिभिः सह मेलनम्, आन्दोलन-समापने सहयोगस्य च आग्रहः



हिमसंस्कृतवार्ता। केन्द्रीयमन्त्री जगतप्रकाशनड्डामहोदयः अद्य नवदेहल्यां प्रदर्शनकारिणां प्रतिनिधिभिः सह मेलनम् अकरोत्।

सामाजिक-माध्यमस्य सन्देशे सः न्यवेदयत् यत् प्रदर्शनकारिणां पक्षात् सर्वकारेण सह वार्तायाः प्रस्तावः आगतः आसीत्, प्रातः १०:५० वादनतः अस्योपरि चर्चा निरन्तरं प्रचलति।श्रीनड्डामहोदयः अकथयत् यत् उपवेशनम् सौहार्दपूर्णे वातावरणे अभवत् तथा च तेषां प्रतिनिधिमण्डलेन सह प्राथमिकी चर्चा विस्तृतमूर्पेण अभवत्। प्रदर्शनकारिणः सायं प्रायः ४:०० (चतुर्वादन) समये सर्वकाराय एकां लिखितां याचिकाम् समर्पितवन्तः। श्रीनड्डामहोदयः सर्वान् प्रदर्शनकारिणः धरना-प्रदर्शनं समापयितुं स्थितेः सामान्यीकरणे च प्रशासनस्य सहयोगं कर्तुं न्यवेदयत्।

# वैदेशिककार्यमन्त्रिणः डॉ. सुब्रह्मण्यम-जयशङ्करस्य पनामा-देशस्य वैदेशिकमन्त्रिणा सह मेलनम्, द्विपक्षीयसम्बन्धानां सुदृढीकरणे विश्वासः

वैदेशिककार्यमन्त्री डॉ. सुब्रह्मण्यम्-जयशङ्करः विश्वासं प्रकटितवान् यत् पनामा-देशस्य वैदेशिकमन्त्रिणः जेवियर-एडुआर्डो-मार्टिनेज-आचा-वास्केज़-महोदयस्य यात्रया सर्वेषु क्षेत्रेषु द्विपक्षीयसम्बन्धाः अधिकाः सुदृढाः भविष्यन्ति। नवदेहल्यां पनामा-देशस्य वैदेशिकमन्त्रिणा सह आयोजितायां सभायां डॉ. जयशङ्करः अवदत् यत् एषा यात्रा उभयोः देशयोः मध्यः सम्प्रति अङ्गीकृतानां उच्चस्तरीय-आदान-प्रदानानां गतिं पुनः अग्रे नयति। सः अकथयत् यत् उभयोः देशयोः सर्वकारौ तयोः नेतारः च भारत-पनामा-सहभागितां गभीरां व्यापकां च कर्तुं उत्सुकाः सन्ति।वैदेशिकमन्त्रिणा उक्तं यत् भारतम् पनामा-देशेन सह घनिष्ठ-सम्बन्धान् स्थापयितुम् उत्सुकम् अस्ति। सः पनामा-देशस्य रणनीतिक-स्थितेः सह अस्य आर्थिक-स्थिरतायाः क्षमतायाः च उपरि अपि प्रकाशं क्षिप्तवान्। सः एतम् अपि विश्वासं व्यक्तीकृतवान् यत् अस्याः यात्रायाः समये कृताः चर्चाः परस्पर-हितस्य क्षेत्रेषु सहयोगस्य नूतनान् मार्गान् उद्घाटयिष्यन्ति।



# KANGRA NEWS - भाजपादलस्य सीमादेवी काङ्गड़ा-जिलापरिषदः अध्यक्षा, अभिमन्युकँवरः च उपाध्यक्षः



**हिमसंस्कृतवार्ताः- धर्मशाला।** काङ्गड़ाजिलापरिषद् स्वकीयौ नूतनौ अध्यक्ष- उपाध्यक्षौ अलभत्। सोमवासरे धर्मशालास्थे जिलापरिषद्- सभागारे विहिते निर्वाचने भाजपादलस्य सीमादेवी सर्वसम्मत्या अध्यक्षा तथा च अभिमन्युकँवरः उपाध्यक्षत्वेन निर्वाचितः। विशेषो विषयः एषः आसीत् यत् द्वाभ्यां पदाभ्यां केवलम् एकम्-एकमेव नामाङ्कनं प्राप्तम्, येन कारणेन सम्पूर्ण-निर्वाचनप्रक्रिया कस्यापि कोलाहलस्य विना निर्विरोधरूपेण सम्पन्ना जाता।

काङ्गड़ामण्डलपरिषदि आहत्य ५४ सदस्याः सन्ति, येषु निर्वाचनप्रक्रियावधौ ३९ सदस्याः सभागारे उपस्थिताः आसन्। एतेषां सदस्यानां उपस्थितौ वार्ड- ८ (कल्याड़ा) क्षेत्रतः निर्वाचिता मण्डलपरिषद् सदस्या सीमादेवी अध्यक्षपदे मुकुटिता कृता। तत्रैव, वार्ड-५३ (शेखुपुरा) क्षेत्रस्य निर्वाचितः सदस्यः अभिमन्युकँवरः सर्वसम्मत्या उपाध्यक्षः घोषितः। विपक्षस्य अन्यस्य वा कस्यापि सदस्यस्य पक्षतः किमपि अधिकारं न उपस्थापितं, येन उभाभ्यां नेतृभ्यां निर्वाचनमार्गः पूर्णतया सुगमः जातः। निर्वाचनप्रक्रियायाः समाप्तौ सद्यः एव उपायुक्तः मण्डल-निर्वाचन-अधिकारी च हेमराज बैरवा महोदयः नवनिर्वाचितायै अध्यक्षायै सीमादेव्यै उपाध्यक्षाय अभिमन्युकँवराय च पदस्य गोपनीयतायाश्च शपथं प्रापयत्। उपायुक्तेन नूतन-दलाय सर्वसदस्येभ्यश्च तेषाम् आगामि- कार्यकालाय शुभकामनाः दत्ताः विकासकार्याणां गतेः प्रदानाय च आशा प्रकटीकृता। अस्मिन् प्रमुखे अवसरे मण्डलपरिषद्-सदस्यैः साकं मण्डलपञ्चायताधिकारी सचिनठाकुरः विविधविभागानाम् उच्चाधिकारिणः कर्मचारिणश्च विशेषरूपेण उपस्थिताः आसन्।

## न आगताः काङ्ग्रेसदलस्य १५ पार्षदाः

मण्डलपरिषद्-निर्वाचनाय आहुतायाः प्रथमायाः एव सभायाः काङ्ग्रेस-समर्थिताः केचन स्वतन्त्राश्च प्रायः १५ मण्डलपरिषद्-सदस्याः उपवेशने न प्राप्ताः। यदा च भाजपादलेन सह बहुशः स्वतन्त्राः मण्डलपरिषद्-सदस्याः अपि भागं स्वीकृत्य सर्वसम्मतिं निर्मितवन्तः।

## भाजपादलेन विजयः जनसमर्थनस्य प्रमाणं कथितम्

निर्वाचनप्रभारी विधायकश्च विपिनसिंहपरमारः अस्मिन् विजये मण्डलपरिषद्-सदस्यान् मतदातॄन् च प्रति कृतज्ञतां प्राकटयत्। तेन प्रोक्तं यत् काङ्गड़ाक्षेत्रे भाजपादलेन अध्यक्ष-उपाध्यक्षपदद्वयं निर्विरोधरूपेण जितं, यद् सङ्कटनस्य दृढैकतायाः जनतायाः विश्वासस्य च निदर्शनं वर्तते। परमार महोदयेन पक्षः कृतः यत् प्रदेशस्य अधिकांश- जिलापरिषत्सु खण्ड-समितिषु च भाजपा- समर्थित- प्रत्याशिनः विजयं प्राप्तवन्तः। तस्यानुसारं पञ्चायत-मण्डलपरिषद्-निर्वाचनानां परिणामैः प्रदेशस्य राजनैतिक-दिशा स्पष्टा विहिता।

## परमार महोदयेन काङ्ग्रेससर्वकारः लक्ष्यीकृतः

भाजपानेत्रा विपिनपरमारेण प्रदेशसर्वकारं प्रति प्रहारं कुर्वता कथितं यत् मुख्यमन्त्रिणा दत्तं 'व्यवस्थापरिवर्तनस्य' घोषवाक्यं धरातले न दृश्यते। तेन आरोपः कृतः यत् प्रदेशस्य युवकाः, कृषकाः, महिलाश्च सर्वकारस्य नीतिभिः निराशाः सन्ति। विद्युत्-धने आरोपितस्य उपकरस्य (सेस) निःशुल्क-विद्युत्-प्रतिज्ञायाः च सन्दर्भे अपि तेन काङ्ग्रेससर्वकारस्य आलोचना कृता। तेनोक्तं यत् पञ्चायत-मण्डलपरिषद्-निर्वाचनानां परिणामाः आगामि-विधानसभा-निर्वाचनानां सङ्केताः सन्ति, भाजपा च २०२७ तमे वर्षे प्रदेशे सर्वकार- निर्माणस्य दिशि अग्रे सरति।

## सुधीरशर्मा अवदत्, सर्वकारस्य सर्वे प्रयासाः विफलाः जाताः

भाजपाविधायकेन सुधीरशर्मणा अपि दलस्य कार्यकर्तृभ्यः वर्धापनानि वितीर्य कथितं यत् काङ्गड़ामण्डलपरिषदि भाजपादलाय पूर्णं बहुमतं प्राप्तम् अस्ति। तेन आरोपः विहितः यत् प्रदेशसर्वकारेण निर्वाचनप्रक्रिया प्रभाविता कर्तुं निर्वाचनं च स्थगयितुं प्रयासः कृतः, परन्तु सः भाजपादलस्य समर्थनं दुर्बलं कर्तुं नाशक्नोत्। तेन विश्वासः कृतः यत् प्रदेशस्य अधिकांश-मण्डलपरिषत्सु भाजपादलेन अध्यक्ष- उपाध्यक्षपदेषु विजयः प्राप्तः, एतच्च जनतायाः काङ्ग्रेससर्वकारात् मोहभङ्गस्य सङ्केतः वर्तते।

## अध्यक्षया सीमाचौधर्या बजट-प्रत्यावर्तनस्य याचना कृता

नवनिर्वाचिता अध्यक्षा सीमाचौधरी भाजपानेतृत्वं मण्डलपरिषद्-सदस्यान् च प्रति आभारं प्रकटयन्ती अवदत् यत् सा पूर्ण-निष्ठया कार्यं विधास्यति। तया कथितं यत् मण्डलपरिषदां वित्तीय-अधिकारः पूर्वतुलनया न्यूनः जातः। तया प्रदेशसर्वकारात् याचना कृता यत् मण्डलपरिषद्- संस्थाभ्यः पूर्ववत् पर्याप्तः आयव्ययकः (बजट) उपलब्धः कारयितव्यः येन ग्रामीणक्षेत्रेषु विकासकार्याणि प्रभावी-रूपेण कर्तुं शक्येरन्।

## उपाध्यक्षेण जनसेवाप्राथमिकता प्रकटीकृता

नवनिर्वाचितेन उपाध्यक्षेण अभिमन्युकँवरेण प्रतिपादितं यत् मण्डलपरिषद्-संस्थायाः सर्वे ५४ सदस्याः मिलित्वा मण्डलस्य विकासाय कार्यं करिष्यन्ति। तेन कथितं यत् सामान्यानां जनानां समस्यानां निस्तारणं तस्य प्रथमा प्राथमिकता भविष्यति, स च जनतायाः कृते सर्वदा उपलब्धः स्थास्यति। वर्षाऋतोः (मानसून) उल्लेखं कुर्वन् तेन प्रोक्तं यत् वर्षाकाले कस्यामपि आपदा-स्थितौ मण्डलपरिषद् पूर्णतत्परतया जनानां साहाय्यं विधास्यति।

# लौकिकन्यायकोशः

## केतकीकुसुमन्यायः

केतकीकुसुमानाम् अतिशयसुगन्धकारणेन सर्वेषां मनः आकृष्टं भवति। परन्तु तत्र वर्तमानानां कण्टकानां कारणेन तेषां समीपं गन्तुं भयमपि भवति। तथैव केषाञ्चन विषये मनसि सपद्येव आकर्षणं भीतिरपि भवतीति सूचयितुम् अस्य न्यायस्य प्रयोगो भवति।

महाकविना कालिदासेन अस्य न्यायस्य सुन्दरः प्रयोगः रघुवंशमहाकाव्ये कृतः यथा-

"भीमकान्तैर्नृप गुणैः स बभूवोपजीविनाम्।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः।।"

(रघुवंशे १-१६)

स्वकीयैः भयजनकैः गुणैः अधृष्यः कमनीयगुणैः च अधिगम्यः अभवत् राजा दिलीपः। समुद्रः तत्र वर्तमानानां जलचराणां कारणेन भयङ्करो भवति परन्तु रत्नादिमूल्यवद्वस्तुनां कारणेन आकर्षणीयः अपि भवति खलु।

**डा. वर्षा प्रकाश टोणगांवकरपुणे, महाराष्ट्रम्**



हिमसंस्कृतवार्ताः, ईदरधीरजः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। प्राग्देशे काचित् विस्मयकरी घटना दृष्टा। युद्धक्रीडायां कस्यचित् यन्त्रमानवस्य शिरः छिन्नम्। तथापि तेन छिन्नशिरस्केन यन्त्रमानवेन युद्धं कृतम्।

**नन्दिनी-** अहो! शिरसा विना अपि युद्धं कृतम् इति अतीव विचित्रम्। अन्या काचित् वार्ता मया श्रुता। अन्तर्जाल-मानचित्रस्य साहाय्येन केनचित् कुतूहलिना जनेन प्राचीनः उल्कापात-गर्तः अन्विष्टः। सः गर्तः बहुप्राचीनः इति वैज्ञानिकैः प्रमाणीकृतम्।

**काव्या-** अन्तर्जाल-मानचित्रेण गर्तः प्राप्तः इति महदाश्चर्यम्! पाश्चात्यदेशे अन्यत् किञ्चित् हास्यजनकं वृत्तं जातम्। तत्र वन्यजीवैः पक्वानि फलानि खादितानि। मत्तैः पशुभिः मार्गेषु आगतम्। अतः यानचालकेभ्यः आरक्षकैः सूचना दत्ता।

**नन्दिनी-** मत्ताः पशवः मार्गेषु भ्रमन्ति इति श्रुत्वा मया हसितम्! परन्तु अहम् अन्याम् एकां भयङ्करीं वार्तां पठितवती अस्मि। चिकित्सकैः कश्चित् नरः मृतः इति घोषितः। यदा तस्य अङ्गानि निष्कासितानि, तदा सः प्रबुद्धः जातः तेन सर्वे वैद्याः चकिताः कृताः।

**काव्या-** अहो भयानकम्! अङ्गनिष्कासनसमये सः प्रबुद्धः इति श्रुत्वा मया भयं प्राप्तम्। अद्यतनीयः वार्तालापः अतीव रोचकः जातः।

# हास्यकणिका

**पतिः** – मम क्षुधा जाता। भोजनं देहि।
**पत्नी** – यदा उदरं पुनः रिक्तं भविष्यति, तर्हि...
पतिः – तिष्ठ तिष्ठ, अहं अवगतम्। अहमेव कम्बलं सुव्यवस्थितं करोमि, त्वं मम कृते भोजनं पच।
पत्नी – 😄 😨 😍

